रणम्। ब्रह्मचर्य्यमहिंसा च साहसानाञ्च वर्जनम्"। एवम् "सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतमुष्णोदकं चैव सद्यः प्राणकराणि षट्" इत्याद्युक्तानि सुश्रुते हिताहितीयाध्याये हिततया चोक्तानि च आयुर्वृद्धिकराणि।

**आयुर्वेद** पु० आयुर्विद्यते लभ्यतेऽनेन विद–लाभे करणे घञ् आयुर्वेत्त्यनेन चिह्नज्ञापनेन विद–ज्ञाने करणे घञ् वा। चिकित्साशास्त्रे तन्निरुक्त्यादिकं सुश्रुते दर्शितं यथा। "शल्यं शालक्यमित्यादि अष्टाङ्गशब्दे ५२३पृष्ठे उक्त्वा मुपक्रम्य "इह खल्वायुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्च। आयुरस्मिन् विद्यतेऽनेन वा आयुर्व्विन्दतीत्यायुर्वेदः। तस्याङ्गवरमाद्यमागमप्रत्यक्षानुमानोपमानैरविरुद्धमुच्यमानमुपधारय। एतद्ध्यङ्गं प्रथमं प्रागभिघातव्रणसंरोहाद्यज्ञशिरःसन्धानाच्च। श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः। भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः। भवद्भ्यां यज्ञस्य शिरःसन्धातव्यम्। तावूचतुरेवमस्त्विति। अथ तयोरर्थे देवा इन्द्रयज्ञभागेन प्रासादयन्। ताभ्यां यज्ञस्य शिरःसंहितमिति। अष्टास्वपि चायुर्व्वेदतन्त्रेष्वेतदेवाधिकमभिमतमाशुक्रियाकरणाद्यन्त्रशस्त्रक्षाराग्निप्रणिधानात्सर्व्वतन्त्रसामान्याच्च। तदिदं शाश्वतं पुण्यं स्वर्ग्यं यशस्यमायुष्यं वृत्तिकरञ्चेति। ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे तस्मादश्विनावश्विभ्यामिन्द्र इन्द्रादहं मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः। भवति चात्र। अहं हि धन्वन्तरिरादिदेवो जरारुजामृत्युहरोऽमराणाम्। शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोऽस्मि गां भूय इहोपदेष्टुम्"।

स चाथर्ववेदस्योपवेदः "विधाताथर्व्वसर्व्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम्" इति भावप्रकाशोक्तेः। चरणव्यूहमते ऋग्वेदस्योपवेदः आयुर्वेदः अथर्ववेदस्य तु शस्त्रशास्त्राण्युपवेदः। स च षोडशर्षिप्रणीतत्वात् षोडशविधः यथोक्तं ब्रह्मवै०पु० "ऋग्यजुःसामाथर्व्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः। विचिन्त्य तेषामर्थं चैवायुर्वेदं चकार सः। कृत्वा तु पञ्चमं वेदं भास्कराय ददौ विभुः। स्वतन्त्रं संहितां तस्मात् भास्करश्च चकार सः। भास्करश्च स्वशिष्येभ्य आयुर्वेदं स्वसंहिताम्। प्रददौ पाठयामास ते चक्रुः संहितास्ततः। तेषां नामानि विदुषां तन्त्राणि तत्कृतानि च। व्याधिप्रणाशबीजानि साध्वि! मत्तो निशामय। धन्वन्तरिर्दिवोदासः काशीराजोऽश्विनीसुतौ। नकुलः सहदेवार्कौ च्यवनो जनको बुधः। जावालो जाजलिः पैलः करथोऽगस्त्यएव च। एते वेदाङ्गवेदज्ञाः षोड़श व्याधिनाशकाः। चिकित्सातत्त्वविज्ञानं नाम तन्त्रमनोपमम्। धन्वन्तरिश्च भगवान् चकार प्रथमे सति!। चिकित्सादर्पणं नाम दिवोदासश्चकार सः। चिकित्साकौमुदीं दिव्यां काशीराजश्चकार सः। चिकित्सासारतन्त्रञ्च भ्रमघ्नं चाश्विनीसुतौ। तन्त्रं वैद्यकसर्वस्वं नकुलश्च चकार सः। चकार सहदेवश्च व्याधिसिन्धुविमर्द्दनम्। ज्ञानार्णवं महातन्त्रं यमराजश्चकार सः। च्यवनो जीवदानञ्च चकार भगवानृषिः। चकार जनको योगी वैद्यसन्देहभञ्जनम्। सर्वसारं चन्द्रसुतो जावालस्तन्त्रसारकम्। वेदाङ्गसारं तन्त्रञ्च चकार जाजलिर्मुनिः। पैलो निदानं करथस्तन्त्रं सर्वधरं परम्। द्वैधनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः। चिकित्साशास्त्रबीजानि तन्त्राण्येतानि षोड़श। व्याधिप्रणाशबीजानि बलाधानकराणि च। मथित्वा ज्ञानमन्थानैरायुर्वेदपयोनिधिम्। ततस्तन्त्राण्युज्जहरुर्नवनीतानि कोविदाः। एतानि क्रमशो दृष्ट्वा दिव्यां भास्करसंहिताम्। आयुर्वेदं सर्व्वबीजं सर्व्वं जानामि सुन्दरि!। व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः। आयुर्व्वेदस्य विज्ञाता चिकित्सासु यथार्थवित्। धर्म्मिष्ठश्च दयालुश्च तेन वैद्यः प्रकीर्त्तितः"। तस्य लक्षणं यथा भा०प्र०। "आयुर्हिताहितं व्याधिनिदानं शमनं तथा। विद्यन्ते यत्र विद्वद्भिः स आयुर्वेद उच्यते" तस्य निरुक्तिस्तत्रैव। "अनेन पुरुषो यस्मात् आयुर्विन्दति वेत्ति च। तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः"। "देहजीवयोर्योगोजीवनं तेनावच्छिन्नः काल आयुः आयुर्बोधद्वारा आयुष्याण्यनायुष्याणि द्रव्यगुणकर्म्माणि ज्ञात्वा तेषां सेवनत्यागाभ्याम् आरोग्येणायुर्विन्दति तेनैव हेतुना परस्यायुर्वेत्ति च येन तद्बोधद्वारा स आयुर्वेदः" भा०प्र० अथायुर्वेदवंशप्रादुर्भावस्तावदभिधीयते यथा भावप्र० "विधाताऽथर्व्वसर्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना-संहिताञ्चक्रे लक्षश्लोकमयीमृजुम्। ततः प्रजापतिं दक्षं दक्षं सकलकर्मसु। विधिर्धीनीरधिः साङ्गमायुर्वेदमुपादिशत्। अथ दक्षप्रादुर्भावः। अथ दक्षः क्रियादक्षः स्वर्वैद्योदेववल्लभः। वेदयामास विद्वांसौ सूर्य्यांशौ सुरसत्तमौ।